DOIs:10.2018/SS/202506014 --:-- Research Paper / Article / Review

# स्त्रीप्रत्ययानाम् अनुबन्धविचारः।

**Dr. Thahira P.**
Associate Professor, Department of Sanskrit,
Sree Neelakanta Govt. Sanskrit College, Pattambi,
Affiliated to University of Calicut, Palakkad, Kerala, India
Email - thahira@sngscollege.org

**सार संक्षेप :** प्रत्ययत्वेन विधीयमानानां सनादीनां चतुश्शताधिकानां पदांशानां प्रत्ययसंज्ञासिद्ध्यर्थं पाणिनिना अष्टाध्याय्यां तृतीयाध्याये प्रथमपादे 'प्रत्ययः' (३-१-१) इति अधिकारसूत्रं कृतम्। पाणिनिकृतप्रत्ययेषु अन्यतमाः भवन्ति स्त्रीप्रत्ययाः। स्त्रीत्वद्योतकाः स्त्रीप्रत्ययाः। चाप् टाप् डाप् ङीन् ङीप् ङीष् ऊङ् इत्येतेषु स्त्रीप्रत्ययेषु चकार-पकार-टकार-डकार-ङकार-नकार-षकाराः-अनुबन्धाः। एतेषां स्त्रीप्रत्ययान्तर्गतानां सप्तवर्णानां अनुबन्धकत्वस्य प्रयोजनमत्र निरूप्यते।

**मुख्य शब्द** : स्त्रीप्रत्ययाः-चाप् –टाप्- डाप्- ङीन्- ङीप्- ङीष्- अनुबन्धाः- ङ्याप्प्रातिपदिकात् ।

## 1. प्रस्तावना।

प्रतीयते विधीयत इति प्रत्ययः। पाणिनिकृतप्रत्ययेषु सविशेषप्रत्ययाः भवन्ति स्त्रीप्रत्ययाः। स्त्रीत्वद्योतकाः स्त्रीप्रत्ययाः। 'प्रत्ययः' (३-१-१) 'परश्च' ( ३-१-२) 'ङ्याप्प्रातिपदिकात्' (४-१-१) इति पूर्वोक्तेषु अधिकारेषु 'स्त्रियाम्' (४-१-३) इत्यधिकृत्य स्त्रीप्रत्ययाः विहिताः। अष्टाध्याय्यां चतुर्थाध्यायस्य प्रथमे पादे तृतीयमिदं सूत्रम्। स्त्रियाम् इत्यधिकारे अष्टौ प्रत्ययाः विहिताः। चाप्, टाप् डाप् ङीप् ङीन् ङीष् ऊङ् इत्येते भवन्ति पाणिनीयव्याकरणे स्त्रीप्रत्ययाः। एतेषु स्त्रीप्रत्ययेषु चकार-पकार-टकार-डकार-ङकार-नकार-षकाराः-अनुबन्धाः। चाप्, टाप् डाप् इत्येतेषु आ इत्येव अवशिष्यते। एवं ङीप् ङीन् ङीष् इत्येतेषु ईकारः। अपि तु तेषाम् अनुबन्धानां पृथक् पृथक् प्रयोजनमस्ति।

## 2. चकारः।

'यङश्चाप्' (४-१-७४) इति सूत्रेण चाप् प्रत्ययो विधीयते। चाप् प्रत्यये चकारस्य अभावे 'ङ्याप्प्रातिपदिकात्' (४-१-१), 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' (६-१-६९), 'औङ आपः' (७-१-१९), 'आङि चापः'(७-३-१०५) 'याडापः' (७-३-११३) इत्येतेषु सूत्रेषु "एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य" इति परिभाषया चकाररहितस्य आपः एव ग्रहणं स्यात्, न तु टाप्डापोर्ग्रहणम्, यतः टाप्डापौ द्व्यनुबन्धकौ। चकारानुबन्धे कृते चाप्, टाप्, डाप् इति त्रयाणामपि द्व्यनुबन्धकत्वात् एकानुबन्धस्य आपोरभावात् तत्तत्सूत्रारम्भसामर्थ्येनैव एषां त्रयाणां ग्रहणं सिद्धम्। सामान्यग्रहणाभावे अजा टाप् इति अजा, सीमन् डाप् – सीमा इत्यादौ 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे स्वादिकार्याणि न सिद्ध्येयुः। एवं 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपः , अजा औ इति अजे, सीमन् औ इति सीमे इत्यादौ आङि चापः इति अङ्गस्येत्वम्, अजायै, अजायाः, अजायाम्, सीमायै, सीमायाः, सीमायाम् इत्यादौ याडापः इति याडागमश्च न स्यात्। सामान्यग्रहणे तु इमे विधयः सिद्ध्यन्ति। इमां सरणिमेवाश्रित्य डापि डकारस्य टापि टकारस्य च प्रयोजनं व्याख्यास्यामः।

चकारानुबन्धकस्य द्वितीयं प्रयोजनं तु कौसल्या इत्यादौ अन्तोदात्तत्वम्। 'चितः' (६-१-१६३) इत्यस्य चिति प्रत्यये सति प्रकृतिप्रत्ययान्तर्भवितसमुदायस्य अन्तोदात्तो स्यात् इत्यर्थः। कौसल्या इत्यत्र चित्वनिमित्तात् अन्तोदात्तः। यद्यपि अत्र चापः पित्वात् 'अनुदात्तो सुप्पितौ' (३-१-४) इत्यनुदात्तत्वं प्राप्नोति। तथापि पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषाबलेन परत्वात् चितः इति सूत्रमेव प्रवर्तते। 'अनुदात्तो सुप्पितौ' (३-१-४) इति सूत्रम् अपेक्ष्य 'चितः' (६-१-१६३) इति परं सूत्रम्।

**3. पकारः ।**

स्त्रीप्रत्ययेषु चाप्,टाप्, डाप्, ङीप् इत्येते चत्वारः पकारानुबन्धयुक्ताः स्त्रीप्रत्ययाः। पकारस्य अनुबन्धकत्वे त्रीणि प्रयोजनानि सन्ति।

प्रथमं तावत् कर्त्री- कर्तृ ङीप्, अजा- अज टाप् , सीमा – सीमन् डाप् इत्यत्र ङीबादीनां प्रत्ययानां पित्वादेव 'अनुदात्तसुप्पितौ' (३-१-४) इति सूत्रेण अकारादीनाम् अनुदात्तत्वं सिद्ध्यति। टाप् डाप् ङीप् इत्येतेषु पित्वाभावे पित्वनिमित्तकानुदात्तत्वं न सिद्ध्येत्। किन्तु चापः पकारस्तु न स्वरार्थः यतः पित्वनिमित्तकानुदात्तत्वं चितः इति चित्वनिमित्ते विहितमुदात्तत्वं बाधते।

द्वितीयं प्रयोजनं तु 'ङ्याप्प्रातिपदिकात्', 'औङ आपः', 'आङि चापः', 'याडापः', 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यादिषु आप् इति सामान्यग्रहणम्। आप् इत्यनेन चाप्, टाप्, डाप् एतेषां त्रयाणां ग्रहणमभीष्टम्। एतेषु यस्य कस्यापि पकारानुबन्धकत्वं न भवति तर्हि अस्य आप् निमित्तकानि कार्याणि न प्राप्नुवन्ति। किञ्च आप्ग्रहणेन 'सानुबन्धग्रहणे निरनुबन्धकस्य' इति परिभाषया पकारानुबन्धरहितस्य ग्रहणं न सिद्ध्येत्।

तृतीयं प्रयोजनं यथा ङीपो ङकारानुबन्धः 'ङ्याप्प्रातिपदिकात्', 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यादिषु ङीष्, ङीन्, ङीप् एतेषां त्रयाणां ग्रहणार्थः। ङीपि पकारग्रहणाभावे तत्र सूत्रे 'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य' इति परिभाषया ङीपः एव ग्रहणं स्यात्, न ङीन्ङीषोर्ग्रहणम्, द्व्यनुबन्धकत्वात्। पकारानुबन्धे कृते द्व्यनुबन्धकत्वात् ङी इति सामान्यग्रहणे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्', 'ङ्याप्प्रातिपदिकात्' इत्युभयत्रापि ङीप्, ङीन्, ङीष् इति त्रयाणामपि ग्रहणम्। एवं सामान्यग्रहणप्रास्यर्थं च पकारानुबन्धः।

**4. टकारः।**

टापि टकारस्य सामान्यप्रयोजनं पूर्वमुक्तम् । टित्वात् एव अम्बष्ठ्य चाप् – आम्बष्ठ्या, सीमन् डाप् – सीमा इत्यादौ 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे स्वादि प्रत्ययाः, 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यनेन सुलोपः आम्बष्ठ्ये, सीमे इत्यादौ औङ आपः इति शी आदेशः, आङि चापः इत्यनेन आम्बष्ठ्यया, सीमया इत्यादौ एत्वं, आम्बष्ठ्यायै, सीमायै इत्यादौ याडापः इति याडागमश्च सिद्ध्यन्ति।

**5. डकारः।**

टाबादि स्त्रीप्रत्ययेषु डाप् इत्येकस्मिन्नेव प्रत्यये डकारानुबन्धः। डित्वस्य द्वे प्रयोजने स्तः। प्रथमं तावत् सामान्यग्रहणे चाप्टापोः सिद्ध्यर्थमेव। डकारस्य अनुबन्धकत्वे शर्कराक्ष्य चाप् – शार्कराक्ष्या, अजा टाप् – अजा इत्यादौ 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे स्वादि प्रत्ययाः, 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इत्यनेन सुलोपः शार्कराक्ष्ये, अजे इत्यादौ 'औङ आपः' इति शी आदेशः, 'आङि चापः' इत्यनेन शार्कराक्ष्यया, अजया इत्यादौ एत्वं, शार्कराक्ष्यायाः, अजायाः इत्यादौ याडापः इति याडागमश्च सुलभः ।

द्वितीयं तु टिलोपसिद्धिः। पामन् डाप् इति स्थिते अनुबन्धलोपे 'डित्वसामर्थ्यात् टेर्लोपः' (६-४-१४३) इति टेर्लोपे (अन् इत्यस्य)[i] पामा इति, तस्मात् विभक्तिकार्ये पामा इति रूपम्। एवं बहुराजन् डाप् = बहुराजा इति। अत्र डित्वसामर्थ्यादेव टेर्लोपे रूपं साधयति।

### 6. ङकारः।

स्त्रीप्रत्ययेषु ङीप्, ङीन्, ङीष्, ऊङ् इति ङकारानुबन्धप्रत्ययाः, अथवा ङित्प्रत्ययाः। ङीप् ङीन् ङीष् इत्यादौ 'ङ्याप्प्रातिपदिकात्' इत्यत्र सामान्यग्रहणार्थमेव ङकारस्य अनुबन्धत्वम्। त्रिष्वपि ङकारः, ततः क्रमेण पकारः नकारः, षकारः च अनुबन्धाः। अतः द्व्यनुबन्धकत्वम्। द्व्यनुबन्धकतया 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे त्रयाणामपि ग्रहणं साध्यम्।

ऊङ् इत्यत्र ङकारस्य अनुबन्धत्वं 'नोङ् धात्वोः'[ii] (६-१-१७५) इत्यत्र विशेषणार्थः। ऊङि ङकारानुबन्धे न कृते 'नोङ् धात्वोः' इत्यस्मिन्नपि सूत्रे ङकारो नावश्यकः। यतः ङकारानुबन्धवान् ऊकाराविशिष्टप्रत्ययो अन्यो न दृश्यते। ततश्च नो धात्वोः इत्येव सूत्रं क्रियेत इति चेन्न, 'अदात्तयणो हल्पूर्वात्' (६-१-१७४)[iii] इति विहितस्य यवाग्वा, यवाग्वै इत्यत्र तृतीयादेः विभक्तेः आद्युदात्तत्वस्य प्रतिषेधापत्तिः स्यात्। 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषया अर्थवन्तः ऊकारस्यैव नोङ् धात्वोः इत्यत्र ग्रहणम्। यवागू शब्दे च ऊकारो नार्थवान्, अगूच् प्रत्ययः एव अर्थवान्। यवागू शब्दः 'सुयुवचिभ्योऽन्युजागूजक्नुचः' ( उणादि ३६१) इति अगूच् प्रत्ययान्तः। एवं यवाग्वा, यवाग्वै इत्यत्र अनर्थकस्य ऊकारस्य स्थाने विद्यमानस्य यणः ग्रहणाभावात् तत्प्रवृत्तिः न स्यात्। अतः ङकारानुबन्धः विशेषणार्थः।

अन्येषु ङीप्, ङीन्, ङीष् प्रत्ययेषु ङकारानुबन्धकत्वस्य प्रयोजनं तु 'ङ्याप्प्रातिपदिकात्' इत्यत्र ङ्यन्तात् इति सामान्यग्रहणसिद्धिरेव। तेषु एकस्मिन्नपि ङकारानुबन्धे न कृते 'ङ्याप्प्रातिपदिकात्' इति सूत्रे अस्य ग्रहणं न स्यात्। एषु त्रिषु प्रत्ययेषु ङकारानुबन्धे कृते तु द्व्यनुबन्धकतया एषां त्रयाणां ग्रहणं सिद्ध्यति। तेन गोपी, वैदी, गौरी, इत्यादौ ङ्यन्तात् 'ङ्याप्प्रातिपदिकात्' इत्यधिकारे सुबुत्पत्तिः सुलोपश्च सिद्धम्।

### 7. नकारः।

'शार्ङ्गरवाद्यञो ङीन्' (४-१-७३) इति ङीन् प्रत्यये एव नकारानुबन्धः। ङीनि ङकारानुबन्धकत्वस्य प्रयोजनं तु 'ञ्नित्यादिर्नित्यम्' (६-१-१९७)[iv] इति सूत्रेण विहितस्य आद्युदात्तत्वम्। यथा शार्ङ्गरवी इत्यत्र ङीनो नित्वात् ञ्नित्यादिर्नित्यम् इत्यनेन आद्युदात्तत्वम्।

### 8. षकारः।

स्त्रीप्रत्ययेषु ङीष् एव षकारानुबन्धप्रत्ययः। 'ङ्याप्प्रातिपदिकात्' इत्यत्र ङ्यन्तात् इति सामान्यग्रहणं भवति षित्वस्य एकं प्रयोजनम्। असति षकारानुबन्धे 'ङ्याप्प्रातिपदिकात्' इत्यादौ ङीग्रहणेन ङीन्ङीपोरेव ग्रहणं स्यात्, न तु ङीषः द्व्यनुबन्धकत्वाभावात्। षकारानुबन्धे सति द्व्यनुबन्धकतया ङीषः अपि ग्रहणम्।

षित्वस्य द्वितीयं प्रयोजनं भवति आद्युदात्तसिद्धिः। ङीषि षकारानुबन्धे कृते पित्वाभावात् 'अनुदात्तौ सुप्पितौ' (३-१-४) इति अनुदात्तत्वस्य अप्राप्त्या 'आद्युदात्तश्च'(३-१-३)[v] इत्यनेन आद्युदात्तत्वम् इष्टरूपं च सिद्ध्यति।

### 9. उपसंहारः।

पाणिनीयव्याकरणम् एकेन वर्णेनापि अनर्थकं भवितुं न अर्हति। तदुक्तं महाभाष्ये पस्पशाह्निके– 'न च यथा लोके, तथा व्याकरणे प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं

वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण किमतो यदशक्यम्?' इति। एवं स्त्रीप्रत्ययोक्तानां एकैकानां अनुबन्धवर्णानामपि प्रयोजनमस्ति।

---

टिप्पणी-

१. अचोऽन्त्यादि टि (१-१-६४)
२. सूत्रार्थः – ऊङो धातोश्च य उदात्त यण् हल्पूर्वः, तस्मात् परा तृतीयादिर्विभक्तिर्न उदात्ता भवति।
३. सूत्रार्थः- उदात्तस्थाने यो यण् हल्पूर्वस्तस्मात्परा नदी शासादिर्विभक्तिश्च उदात्ता स्यात्।
४. ञिति निति च नित्यम् आदिरुदात्तो भवति।
५. प्रत्यय आद्युदात्त एव स्यात्।

**ग्रन्थसूची-**

१. भट्टोजिदीक्षितः,*वैय्याकरणसिद्धान्तकौमुदी,* चौखम्भा पब्लिकेशन्स, पि बि न० ११५०, वाराणसी- २२१००१, २०१८. ऐ एस् बि एन्: ९७८-९३-८६७३५-७४-४.
२. पतञ्जलिः,*व्याकरणमहाभाष्यम्,* चौखम्भा संस्कृतप्रतिष्ठान, ३८ यू ए जवाहर नगर, बंगलो रोड, दिल्ली११०००७, २०१४. ऐ एस् बि एन् ९७८-८१-७०८४-०२६-०(१)
३. डॉ महेशचन्द्र, *पाणिनीयव्याकरण में स्त्रीप्रत्ययार्थमीमांसा,* चौखम्भा पब्लिशर्स, गोकुल भवन, के-३७/१०९, वाराणसी- २२१००१, २०१७